# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च-एप्रिल् २०१९

**कक्षा**-आचार्य-२(SEM-4) **प्रश्नपत्रम्** - ३ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड- CE- 5411** **समयः** - ११ तः २

**दिनाङ्कः** - ०१/०४/२०१९ **सन्दर्भग्रन्थः**- रसगङ्गाधरः प्रथमाननम्

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ द्वयोरेकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. रतिः शोकश्च निर्वेद-क्रोधोत्साहश्च विस्मयः ।
हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ॥

२. रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्येत, इति यथाशास्त्रमेव ज्यायः ।

**प्रश्नः २ द्वयोरेकं सविस्तरं साधयत ।** **१०**

१. जगन्नाथदिशा रससिद्धान्तान् सङ्क्षेपतो लिखत ।

२. नाट्ये शान्तरसस्य सम्भावनां चर्चयत ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ द्वयोरेकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. एतेषां परस्परं कैरपि सहाविरोधः, कैरपि विरोधः । तत्र-
वीरशृङ्गारयोः, शृङ्गारहास्ययोः, वीराद्भुतयोः, वीररौद्रयोः, शृङ्गाराद्भुतयोश्चाविरोधः ।

२. बाध्यत्वं च रसस्य प्रबलैर्विरोधिनो रसस्याङ्गैर्विद्यमानेष्वपि स्वाङ्गेषु, निष्पत्तेः प्रतिबन्धः ।

**प्रश्नः ४ निम्नाङ्कितयोः प्रश्नयोः कस्यचिदेकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. रसानां विरोधाविरोधविषये सविशदं चर्चां कुरुत ।

२. रसदोषान् परिगणय्य त्रीन् दोषान् सोदाहरणं प्रतिपादयत ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधो लिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. शब्दानां भिन्नानामप्येकत्वप्रतिभानप्रयोजकः संहितयैकजातीयवर्णविन्यासविशेषो गाढत्वापरपर्यायः श्लेषः ।

२. अविदग्धवैदिकादिप्रयोगयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभारूप-मौज्ज्वल्यं कान्तिः ।

**प्रश्नः ६ द्वयोरेकं सविस्तरं साधयत ।** **१०**

१. पण्डितराजमतानुसारं माधुर्यादीनां त्रयाणां गुणानां रसमात्रधर्मत्वं प्रतिपादयत ।

२. केषाञ्चित् त्रयाणाम् अर्थगुणानां लक्षणोदाहरणानि सम्यग्निरूप्यन्ताम् ।

## ॥ चतुर्थान्वितिः ॥ (Unit-4)

**प्रश्नः ७ द्वयोरेकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. स्त्रीणां पुरुषमुखावलोकनादेः, पुंसां च प्रतिज्ञाभङ्गपराभवादेरुत्पन्नो वैवर्ण्याधोमुखत्वादिकारणी-भूतश्चित्तवृत्तिविशेषो व्रीडा ।

२. इष्टप्राप्त्यनिष्टप्राप्त्यादिजनितो ध्यानापरपर्यायो वैवर्ण्य-भूलेखनाधोमुखत्वादिहेतु-श्चित्तवृत्तिविशेषश्चिन्ता ।

**प्रश्नः ८ द्वयोरेकस्य निबन्धात्मकमुत्तरं यच्छत ।** **१०**

१. हर्षादीन् त्रयस्त्रिंशद्भावान् विलिख्य भावद्वयं सोदाहरणं लिखत ।

२. रसाभासं सोदाहरणं विवृणुत ।

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. रसगङ्गाधरकारमतानुसारं कति रसाः?

२. शृङ्गारः कतिविधः?

३. हासस्य किं लक्षणम्?

४. वीरः कतिविधः?

५. वीरशृङ्गारयोः विरोधः अविरोधो वा?

६. औचित्यसम्प्रदायस्य प्रवर्तकः कः?

७. शब्दगुणे प्रदत्तायाः समतायाः लक्षणं लिखत ।

८. मरणभावं निरूपयत ।

९. मम्मटादीनां मतानुसारं कति गुणाः?

१०. का नाम स्मृतिः?

११. का नाम भावशान्तिः?

१२. अनुचितविभावालम्बनत्वं.....(पूरयतु) ।

१३. किं नाम रसाभासत्वम्?

१४. जगन्नाथस्य काव्यलक्षणं किम् ?

१५. किं नाम भावत्वम्?

०००